## PART—II

## ( SANSKRIT )

41. बुद्धचरिततृतीयसर्गस्य किं नाम?

(A) अन्तःपुरविलापः

(B) अन्तःपुरविहारः

(C) संवेगोत्पत्तिः

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

42. "बहिःप्रयाणाय चकार बुद्धिमन्तर्गृहे नाग इवावरुद्धः।" इत्यत्र 'नाग' इत्यस्य कोऽर्थः?

(A) सर्पः

(B) हस्तिः

(C) पर्वतः

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

43. "कोटरसम्भवापि मधुकरी पुष्करमधुकमेव अभिलषति" अभिज्ञानशाकुन्तले चतुर्थाङ्के कस्येदं कथनम्?

(A) कण्वस्य

(B) अनसूयायाः

(C) प्रियम्वदायाः

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

44. "अर्थो हि कन्या परकीय एव" अभिज्ञान-शाकुन्तले चतुर्थाङ्के कस्येदं कथनम्?

(A) शार्ङ्गरवस्य

(B) अनसूयायाः

(C) ऋषिकुमारस्य

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

45. अभिज्ञानशाकुन्तले नाटके कति अङ्काः सन्ति?

(A) 8

(B) 6

(C) 7

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

46. 'स्वप्नवासवदत्तम्' इति नाटके कति अङ्काः सन्ति?

(A) 5

(B) 6

(C) 8

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

47. ''इमां सागरपर्यन्तां हिमवद्विन्ध्यकुण्डलाम्।
महीमेकातपत्राङ्कां राजसिंहः प्रशास्तु नः॥''

इति भरतवाक्यं कस्मिन्नाटकेऽस्ति?

(A) 'अभिज्ञानशाकुन्तलम्' इति नाटके

(B) 'मुद्राराक्षसम्' इति नाटके

(C) 'उत्तररामचरितम्' इति नाटके

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

48. मेघदूतानुसारं यक्षेण शापानन्तरमेकवर्षपर्यन्तं कुत्र निवासः कृतः?

(A) हिमालयस्थाश्रमेषु

(B) विन्ध्याश्रमेषु

(C) रामगिर्याश्रमेषु

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

49. 'मेघदूतम्' कीदृशं काव्यमस्ति?

(A) महाकाव्यम्

(B) खण्डकाव्यम्

(C) रूपकम्

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

50. कठोपनिषदनुसारं मनसस्तु परा का भवति?

(A) तन्मात्रा

(B) आत्मा

(C) इन्द्रियाणि

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

51. कठोपनिषदनुसारम् अर्थेभ्यः परं किम्भवति?

(A) मनः

(B) चक्षुः

(C) तन्मात्रा

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

52. 'मेघदूतम्' इत्यनुसारं संतप्तानां कः शरणमसि?

(A) मेघः/पयोदः

(B) धनपतिः

(C) यक्षेश्वरः

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

53. "सद्यःपाति प्रणयि हृदयं विप्रयोगे रुणद्धि" इत्यत्र 'विप्रयोगे' इत्यस्य कोऽर्थः?

(A) विशिष्टप्रयोगे

(B) वियोगे

(C) अनुयोगे

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

54. नीतिशतकानुसारं कः सुखतरम् आराध्यते?

(A) अज्ञः

(B) कृषकः

(C) विशेषज्ञः

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

55. 'दण्डनीतिरेका विद्या' इति के स्वीकुर्वन्ति?

(A) मानवाः

(B) बार्हस्पत्याः

(C) औशनसाः

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

56. कौटिल्यमते कति विद्याः सन्ति?

(A) द्वे

(B) चतस्रः

(C) तिस्रः

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

57. बार्हस्पत्या अधोऽङ्कितासु कां विद्यां स्वीकुर्वन्ति? कौटिल्य-अर्थशास्त्रानुसारमुत्तरयत—

(A) आन्वीक्षिकीम्

(B) सांख्यम्

(C) त्रयीम्

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

58. उत्तररामचरिते कति अङ्काः सन्ति?

(A) पञ्च

(B) सप्त

(C) षट्

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

59. उत्तररामचरितस्य तृतीयोऽङ्कः केन नाम्ना प्रसिद्धः?

(A) चित्रदर्शनम्

(B) पञ्चवटीप्रवेशः

(C) छाया

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

60. "त्वमेव ननु कल्याणि! सञ्जीवय जगत्पतिम्।
प्रियस्पर्शो हि पाणिस्ते तत्रैष निरतो जनः॥"

उत्तररामचरितस्य तृतीयेऽङ्के कस्येदं कथनम्?

(A) सीतायाः

(B) मुरलायाः

(C) तमसायाः

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

61. यौवनप्रभवं तमः कीदृशो भवति?

(A) अरत्नालोकच्छेद्यम्

(B) महोजन्यः

(C) अहङ्कारजन्यः

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

62. अधोलिखितेषु शुकनासोपदेशानुसारं का अनर्थपरम्परा नास्ति?

(A) अभिनवयौवनत्वम्

(B) अप्रतिमरूपत्वम्

(C) अमानुषशक्तित्वम्

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

63. कं ब्रह्मापि रञ्जयितुम् असमर्थः? नीतिशतकमधिकृत्य उत्तरं लिखत।

(A) मोहग्रस्तं जनम्

(B) क्रुधं भुजङ्गम् इव नरम्

(C) अज्ञानोपहितं जनम्

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

64. 'नीतिशतकम्' इत्यनुसारं किं विभूषणम् अस्ति—अपण्डितानाम्?

(A) ज्ञानम्

(B) अध्ययनम्

(C) मौनम्

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

65. अधोऽङ्कितेषु भगवद्गीता-अनुसारम् आत्मनो विशेषणं नास्ति

(A) अच्छेद्यः

(B) अदाह्यः

(C) अनित्यः

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

66. अधोऽङ्कितेषु भगवद्गीता-अनुसारम् आत्मनो विशेषणमस्ति

(A) अजः

(B) व्यक्तः

(C) अशाश्वतः

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

67. यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ।
_____ सोऽमृतत्वाय कल्पते॥

अस्मिन् श्लोके निम्नाङ्कितेषु किमस्ति पदपूर्त्यर्थकं वाक्यांशम्? भगवद्गीतानुसारमुत्तरयत।

(A) कथं स पुरुषः पार्थ!

(B) समदुःखसुखं धीरं

(C) विनाशमव्ययस्यास्य

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

निर्देशः—अधोलिखितं गद्यांशं पठित्वा 68–72 प्रश्नानां विकल्पात्मकोत्तरेभ्यः उचिततमम् उत्तरं चित्वा लिखत।

अस्माकं प्रदेशस्य राजधानी लखनऊ-नगरमस्ति। तद् नगरं निकषा नैमिषारण्यं प्राचीनं तीर्थस्थलम् अतीव प्रसिद्धम् अस्ति। तत्र पुरा एकस्मिन् आश्रमे ऋषयः मुनयः गुरवः कवयः छात्राश्च निवसन्ति स्म। आश्रमस्य विशालपरिसरे अश्वत्थ-वट-निम्बाशोकवृक्षाणां गहना छाया भवन्ति स्म। तत्र फालिशालिनः आम्राऽमलक-पनस-पेरुवृक्षाः अपि विपुला आसन्। एभिः वृक्षैः तत्र पर्यावरणम् अत्यन्तं शुद्धमासीत्। येन शीतला वायवः मन्दं मन्दं निरन्तरं वहन्ति स्म। काले काले च मेघः वर्षति स्म।

68. 'अश्वत्थ' इति पदस्य कोऽर्थः?

(A) पारेवत

(B) न्यग्रोध

(C) पिप्पल

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

69. लखनऊ-नगरं कस्य प्रदेशस्य राजधानी आसीत्?

(A) आन्ध्रप्रदेशस्य

(B) उत्तरप्रदेशस्य

(C) राजस्थानस्य

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

70. आश्रमस्य परिसरे कस्य वृक्ष नास्ति?

(A) अमलक

(B) पनस

(C) खर्जूरः

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

71. काले काले मेघः कुत्र वर्षति स्म?

(A) आश्रमे

(B) लखनऊ-नगरे

(C) वने

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

72. 'निकषा' इति पदस्य कोऽर्थः?

(A) परित

(B) अग्रे

(C) समीप

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

निर्देशः —अधोलिखितं गद्यांशं पठित्वा 73–78 प्रश्नानां विकल्पात्मकोत्तरेभ्यः उचिततमम् उत्तरं चित्वा लिखत।

प्रकृतिः समेषां प्राणिनां संरक्षणाय यतते। इयं सर्वान् पुष्णाति विविधैः प्रकारैः, तर्पयति च सुखसाधनैः। पृथिवी, जलं, तेजो, वायुः आकाशश्चास्याः प्रमुखानि तत्त्वानि। तान्येव मिलित्वा पृथक्तया वाऽस्माकं पर्यावरणं रचयन्ति। आव्रियते परितः समन्तात् लोकोऽनेनेति पर्यावरणम्। यथा जातशिशुः मातृगर्भे सुरक्षितस्तिष्ठति तथैव मानवः पर्यावरणकुक्षौ। परिष्कृतं प्रदूषणरहितं च पर्यावरणमस्मभ्यं सांसारिकं जीवनसुखं, सद्विचारं सत्यसङ्कल्पं माङ्गलिकसामग्रीञ्च ददाति। प्रकृति कोपैः आतङ्कितो जनः किं कर्तुं प्रभवति? जलप्लावनैः, अग्निभयैः, भूकम्पैः, वात्याचक्रैः, उल्कापातादिभिश्च सन्तप्तस्य मानवस्य क्व मङ्गलम्?

73. प्रकृतेः प्रमुखानि तत्त्वानि कति सन्ति?

(A) 5

(B) 7

(C) 6

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

74. परिष्कृतं प्रदूषणरहितञ्च पर्यावरणम् अस्मभ्यं किं ददाति?

(A) सद्विचारम्

(B) माङ्गलिकसामग्रीम्

(C) सत्यसङ्कल्पम्

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

75. अधोऽङ्कितेषु प्रकृतेः किं प्रमुखं तत्त्वं नास्ति?

(A) वायुः

(B) जलम्

(C) वनम्

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

76. प्रकृतिः किं करोति?

(A) विविधैः प्रकारैः सर्वान् पुष्णाति

(B) विविधैः प्रकारैः सर्वान् मारयति

(C) विविधैः प्रकारैः सर्वान् पाठयति

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

77. अधोऽङ्कितेषु कस्य उपयोगः पर्यावरणस्य निर्माणे न भवति?

(A) जलस्य

(B) दुर्गस्य

(C) वायोः

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

78. मानवः पर्यावरणकुक्षौ तथैव सुरक्षितो भवति यथा

(A) मातृगर्भे शिशुः

(B) पर्वतगुफायां नरः

(C) पितृसमीपे शिशुः

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

निर्देशः —अधोलिखितं गद्यांशं पठित्वा **79–84** प्रश्नानां विकल्पात्मकोत्तरेभ्यः उचिततमम् उत्तरं चित्वा लिखत।

प्रकृतिरस्माभिः रक्षणीया। तेन च पर्यावरणं रक्षितं भवति। प्राचीनकाले लोकमङ्गलाशंसिनः ऋषयो वने निवसन्ति स्म। यतो हि वने एव सुरक्षितं पर्यावरणमुपलभ्यते स्म। विविधाः विहगाः कलकूजितैस्तत्र श्रोत्ररसायनं ददति। सरितो गिरिनिर्झराश्च अमृतस्वादु निर्मलं जलं प्रयच्छन्ति। वृक्षा लताश्च फलानि पुष्पाणि इन्धनकाष्ठानि च बाहुल्येन समुपहरन्ति। शीतलमन्दसुगन्धवनपवना औषधकल्पं प्राणवायुं वितरन्ति।

धर्मो रक्षति रक्षितः इत्यार्षवचनम्। पर्यावरणरक्षणमपि धर्मस्यैवाङ्गमस्ति ऋषयः प्रतिपादितवन्तः। तत एव वापीकूपतडागादिनिर्माणं देवायतनविश्रामगृहादिस्थापनञ्च धर्मसिद्धेः स्रोतोरूपेणाङ्गीकृतम्।

79. "शीतलमन्दसुगन्धवनपवना औषधकल्पं प्राणवायुं वितरन्ति" इत्यत्र 'औषधकल्पम्' इति पदं कस्य विशेषणम्?

(A) लतानाम्

(B) पृथिव्याः

(C) वनस्पतीनाम्

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

80. 'गिरिनिर्झराः' इत्यस्य कोऽर्थः?

(A) पर्वतानां प्रपाताः

(B) पर्वतानां मार्गाः

(C) पर्वतानां सरितः

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

81. प्राचीनकाले ऋषयः कुत्र निवसन्ति स्म?

(A) गुरुकुलेषु

(B) वनेषु

(C) आश्रमेषु

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

82. पर्यावरणं कस्य अङ्गमस्ति?

(A) पुण्यस्य

(B) स्वच्छतायाः

(C) धर्मस्य

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

83. "विविधाः विहगाः" इत्यत्र 'विहगाः' इत्यस्य पदस्य कोऽर्थः?

(A) खेचराः

(B) पक्षिणः

(C) खगाः

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

84. प्रकृतेः रक्षणेन कस्य रक्षा भवति?

(A) पर्यावरणस्य

(B) वनानाम्

(C) भूमेः

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

निर्देशः—अधोलिखितं गद्यांशं पठित्वा **85–90** प्रश्नानां विकल्पात्मकोत्तरेभ्यः उचिततमम् उत्तरं चित्वा लिखत।

चाणक्यः प्राचीनभारतस्य निर्भीको दूरदर्शी राजनीतिज्ञः शास्त्रज्ञो विद्वान् आसीत्। तस्य पितृप्रदत्तं नाम विष्णुगुप्त आसीत्। अयमेव 'कौटिल्यः' इति प्रसिद्ध आसीत्। केषाञ्चिद् विदुषामिदमपि मतमस्ति यद् राजनीतिशास्त्रे कुटिलनीतेः प्रतिष्ठापनाय तस्याः स्वजीवने उपयोगाय च अयं 'कौटिल्यः' इत्यपि कथ्यते। चणकनामकस्य कस्यचित् आचार्यस्य पुत्रत्वात् 'चाणक्यः' इति नाम्ना स प्रसिद्धो जातः। नन्दानां राज्यकालः शतवर्षाणि पर्यन्तमासीत्। तेषु अन्तिमेषु द्वादशवर्षेषु एतेन सुमाल्यादीनाम्/ अष्टनन्दानां संहारः कारितस्तथा च चन्द्रगुप्तमौर्यः नृपत्वेन राजसिंहासने स्थापितः। एतेन भारतीय-शासन-व्यवस्थायाः प्रामाणिक-तत्त्वानां वर्णनेन युक्तं 'अर्थशास्त्रम्' इति अतिमहत्त्वपूर्णो ग्रन्थो रचितः।

85. चणकस्य पुत्रः क आसीत्?

(A) कणादः

(B) कौटिल्यः

(C) शौनकः

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

86. अर्थशास्त्रस्य को लेखकः?

(A) कौटिल्यः

(B) कणादः

(C) शौनकः

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

87. चाणक्येन कति नन्दानां संहारः कारितः?

(A) 10

(B) 8

(C) 18

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

88. चाणक्यस्य पितृप्रदत्तं नाम किमासीत्?

(A) विष्णुगुप्तः

(B) धर्मगुप्तः

(C) कौटिल्यः

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

89. नन्दानां राज्यकालः कति वर्षाणि पर्यन्तमासीत्?

(A) 95

(B) 100

(C) 80

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

90. चाणक्येन नन्दानां संहारं कृत्वा को राजा नियुक्तः?

(A) चन्द्रगुप्तमौर्यः

(B) शौर्यगुप्तमौर्यः

(C) समुद्रगुप्तमौर्यः

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

**निर्देशः**—अधोलिखितं गद्यांशं पठित्वा **91–95** प्रश्नानां विकल्पात्मकोत्तरेभ्यः उचिततमम् उत्तरं चित्वा लिखत।

ग्राम्यजीवनं सुव्यवस्थितं भवति। ग्रामे प्रायेण सर्वे स्वस्थाः भवन्ति। वनेषु नगरेषु च तथा जीवनं न भवति वस्तुतः ग्रामाः वननगरयोः मध्ये सन्ति। ग्रामीणाः जनाः प्रायेण कृषीवलाः भवन्ति। ते च प्रातः कालात् सायं यावत् क्षेत्रेषु कर्म कुर्वन्ति। क्षेत्राणि परितः वारिणा पूर्णा कुल्याः भवन्ति। कृषकाः क्षेत्राणि हलेन कर्षन्ति। कुल्याजलेन तानि सिञ्चन्ति। तत्र बीजानि वपन्ति च।

91. ग्राम्यजीवनं कथं भवति?

(A) दुष्करम्

(B) सुव्यवस्थितम्

(C) व्ययसाध्यम्

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

92. ग्रामीणाः जनाः प्रायेण कीदृशाः भवन्ति?

(A) सर्वे स्वस्थाः

(B) निष्कपटाः

(C) रुग्णा

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

93. के प्रातः कालात् सायं यावत् क्षेत्रेषु कर्म कुर्वन्ति?

(A) नागरिकाः

(B) कृषकाः

(C) ग्रामीणाः

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

94. 'कृषीवला'-शब्दस्य का अर्थः?

(A) गोपालः

(B) कृषकाः

(C) व्यवसायिकाः

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

95. एतस्य गद्यखण्डस्य समुचितं शीर्षकं किम्?

(A) ग्राम्यजीवनम्

(B) नागरिकाः

(C) कृषीवलाः

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

**निर्देशः**—अधोलिखितं गद्यांशं पठित्वा **96–100** प्रश्नानां विकल्पात्मकोत्तरेभ्यः उचिततमम् उत्तरं चित्वा लिखत।

संस्कृतभाषायाः व्याकरणशास्त्रे पाणिनिर्महान् वैयाकरण अभवत्। अस्य पितुर्नाम पणिनः मातुश्च नाम दाक्षी आसीत्। तस्मादेव दाक्षीपुत्रः पाणिनिः कथ्यते। छन्दशास्त्रस्य रचयिता पिंगलः पाणिने अनुजः आसीत्। अतः छन्दशास्त्रं 'पिंगलशास्त्रम्' इत्युच्यते। पाणिनि ख्रिष्टाब्दात् पञ्चशतवर्षपूर्वम् (500 ई० पू०) अजायत्। तस्य जन्म शलातुरग्रामे अभवत्, तस्माद् अयं शालातुरीयः अपि उच्यते। शालातुरग्रामस्यैव नाम सम्प्रति लाहौर इति जातम्।

96. कस्मिन् ग्रामे पाणिनिः अजायत्?

(A) शालपुरः

(B) शलातुरः

(C) शिवपुरः

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

97. पाणिनेर्मातुर्नाम किम्?

(A) गोणिका

(B) दाक्षी

(C) दाक्षायणी

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

98. पाणिने जन्म कदा अभवत्?

(A) 200 ई० पू०

(B) 300 ई० पू०

(C) 50 ई० पू०

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

99. पाणिनिः कस्य शास्त्रस्य ज्ञाता आसीत्?

(A) छन्दशास्त्रम्

(B) पिंगलशास्त्रस्य

(C) व्याकरणशास्त्रम्

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

100. छन्दशास्त्रस्य रचनाकारः कः आसीत्?

(A) पाणिनिः

(B) कात्यायनः

(C) पिंगलः

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

101. संस्कृतभाषायां कति कारकाणि भवन्ति?

(A) पञ्च

(B) सप्त

(C) षट्

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

102. 'किम्' इति सर्वनामशब्दस्य नपुंसकलिङ्गे द्वितीयाविभक्तौ बहुवचने किं रूपं भवति?

(A) किम्

(B) कानि

(C) कान्

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

103. 'एकादशन्' इत्यस्य नपुंसकलिङ्गे प्रथमाविभक्तौ बहुवचने किं रूपं भवति?

(A) एकादशानि

(B) एकादशान्

(C) एकादशाणि

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

104. 'सर्व + ऐक्यम्' इत्यत्र का सन्धिर्भविष्यति?

(A) सर्वेक्यम्

(B) सर्वैक्यम्

(C) सर्वा एक्यम्

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

105. 'यद्यपि' इत्यस्य सन्धिच्छेदो भविष्यति—

(A) यद् + यपि

(B) यदि + अपि

(C) यद् + इद् + पि

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

106. 'सच्चिदानन्दः' इत्यस्य सन्धिच्छेदो भविष्यति—

(A) सच् + चिदा + नन्दः

(B) सत् + चिदा + नन्दः

(C) सत् + चित् + आनन्दः

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

107. 'आगत्य' इत्यस्य सन्धिच्छेदो भविष्यति—

(A) आ + गम् + ल्यप्

(B) आ + ग + तुक् + यत्

(C) आम् + गम् + य

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

108. 'एतादृशः' इत्यस्मिन् पदे किम् उपपदम्, को धातुः, कश्च प्रत्ययः?

(A) इदम् + दृश् + किन्

(B) एतद् + दृश् + क्स

(C) एता + दृंह + कञ्

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

109. वह गाँव में निर्धनों को अपने हाथों से दान दे रहा है।

अस्य वाक्यस्य संस्कृतभाषायाम् अनुवादो भविष्यति—

(A) स ग्रामे निर्धनान् स्वहस्तात् दानं ददाति।

(B) स ग्रामे निर्धनेभ्यः स्वहस्ताभ्यां दानं ददासि।

(C) स ग्रामे निर्धनाय स्वहस्तात् दानं ददाति।

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

110. विश्वामित्र राजा दशरथ के पास गया।

अस्य वाक्यस्य संस्कृतभाषायाम् अनुवादो भविष्यति—

(A) विश्वामित्रः राजस्य दशरथस्य समीपे जगाम।

(B) विश्वामित्रः! राज्ञां दशरथे समीपे जगाम।

(C) विश्वामित्रः राज्ञः दशरथस्य समीपे जगाम।

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

111. राम ने बाण से बाली को मारा।

अस्य वाक्यस्य संस्कृतभाषायाम् अनुवादो भविष्यति—

(A) रामेण बाणेन बालिं हन्ति।

(B) रामः बाणेन बालिं जघान।

(C) रामः बाणात् बालिं मारयति।

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

112. लता को लड्डू अच्छे लगते हैं।

अस्य वाक्यस्य संस्कृतभाषायाम् अनुवादो भविष्यति—

(A) लतायै मोदकाः रोचन्ते।

(B) लतान् मोदकाः रोचन्ते।

(C) लतां मोदकाः रोचन्ते।

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

113. प्राणिमात्र का भला हो।

अस्य वाक्यस्य संस्कृतभाषायाम् अनुवादो भविष्यति—

(A) प्राणिमात्राय भद्रं भूयात्।

(B) प्राणिमात्रस्य भद्रं भूयात्।

(C) सर्वे सन्तु निरामया।

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

114. सब सैनिकों में वीरेन्द्र शूरवीर है।

अस्य वाक्यस्य संस्कृतभाषायाम् अनुवादो भविष्यति—

(A) सर्वेषु सैनिकेषु वीरेन्द्रः शूरवीरतमो विद्यते।

(B) सर्वेषां सैनिकानां वीरेन्द्रः शूरवीरतमो विद्यते।

(C) सर्वात् सैनिकात् वीरेन्द्रः शूरवीरतमो विद्यते।

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

115. बालक प्रातःकाल विद्यालय को जाते हैं।

अस्य वाक्यस्य संस्कृतभाषायाम् अनुवादो भविष्यति—

(A) बालकाः प्रातःकाले विद्यालयाय गच्छन्ति।

(B) बालकाः प्रातःकाले विद्यालये गच्छन्ति।

(C) बालकाः प्रातःकाले विद्यालयं गच्छन्ति।

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

116. स्वरस्य कति भेदानि?

(A) 2

(B) 4

(C) 3

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

117. माहेश्वरसूत्राणि कति प्रकाराणि सन्ति?

(A) 14

(B) 13

(C) 10

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

118. संस्कृतभाषायां लिङ्गस्य कति प्रकाराणि सन्ति?

(A) 3

(B) 4

(C) 2

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

119. 'अष्टाध्यायी' कस्य कृतिः?

(A) कात्यायनः

(B) पतंजलिः

(C) पाणिनिः

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति

120. संयुक्तस्वरस्य कति प्रकाराणि?

(A) अ इ उ ण

(B) ए ओ ऐ औ

(C) अ ऋ ऌ

(D) उपर्युक्तेषु एकस्मादधिकः

(E) उपर्युक्तेषु किञ्चन अपि नास्ति